# विशिष्टाद्वैतशास्त्रे ब्रह्मणः अभिन्ननिमित्तोपादानत्वम्

प. रामानुजः, बेंगलूरु

आविष्णोरभिवन्द्यादावाचार्याणां परम्पराम् । वेदाचार्यान् स्वतातांश्च पराङ्कुशसदाह्वयान् ॥

विदुषां कृष्णमूर्तीनां पितृपादजनेर्महे । शताब्द्यां शास्त्रिवर्याणां तत्स्नेहप्रेरणान्मुदा ॥

वात्स्यरामानुजार्येण तैत्तिरीयमधीयता । ब्रह्मैव जगतो हेतुरुपादाननिमित्तकम् ॥

श्रीमद्रामानुजाचार्यदर्शने सम्प्रकाश्यते । स्यादेतत् प्रीतये तेषां विदुषामपि सर्वतः ॥

परमसुहृदां विद्वत्तल्लजानां ब्रह्मश्री कृष्णमूर्तिशास्त्रिणां पूज्यपितृपादीयजन्मशताब्द्युत्सवावसरे ममापि लेखरूपेण भागग्रहणावकाशं कल्पितवतां तेषां कार्तज्ञ्यं व्याहृत्य वेदविद्यानिष्ठानाम् उत्सवनायकानां तथा समेषां विदुषां च प्रीतये 'विशिष्टाद्वैतशास्त्रे ब्रह्मणः अभिन्ननिमित्तोपादानत्वम्' इति तैः निर्दिष्टविषयमधिकृत्य यथाश्रुतं किञ्चित् प्रतिपादये । अनेन वाचिककैङ्कर्येण प्रीयतां श्रुतिशिरसि विदीप्तो भगवान् श्रीनिवासः ।

### उपोद्घातः

उपनिषत्सु अचेतनस्य जगतः, चेतनानां बहूनां नित्यानां जीवात्मनां तथा तयोः नियामकस्य ईश्वरस्य च तत्त्वं याथात्म्येन प्रतिपादितं, 'भोक्ता भोग्यं प्रेरितारं च मत्वा जुष्टस्ततस्तेन अमृतत्वमेति' इति, 'नित्यो नित्यानां चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान्', 'त्वमेकोऽसि बहूननुप्रविष्टः', 'अन्तः प्रविष्टः शास्ता जनानाँ सर्वात्मा', 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो', 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत', 'पुरुष एवेदँ सर्वम्' इत्यादिषु । मुक्तावपि जीवात्मानः ब्रह्मणा आनन्दसाम्यं भजमानाः तत्सेवां कुर्वत इति 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति', 'रसो वै सः । रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति ।', 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूम्' स्वामित्यादिषु प्रतिपाद्यते ।

### जगतः सृष्टिविचारः

तस्यैतस्य तत्त्वत्रयविशिष्टस्य जगतः कारणभूतं ब्रह्म 'एकमेवाद्वितीयम्' इत्यपि स्पष्टम् उद्घोषयन्ति श्रुतयः । तर्हि आपाततः द्वैधमिव दृश्यते यत् तत्त्वानां त्रितयं सत्यं वा उत एकमेव अद्वितीयं वेति सन्देहेन । चेतनाचेतनरूपजगतः ब्रह्मणश्च भेदबोधिनीनाम् अभेदबोधिनीनां तयोः ऐकार्थ्यबोधिनीनां घटकानां च श्रुतीनां मिथः विरोधाभावं, सर्वश्रुतिसमप्रामाण्यं, श्रुत्येकसमधिगम्यत्वं च ब्रह्मणः सम्यगुपपादितं भगवद्रामानुजाचार्यैः स्वोपज्ञश्रीभाष्ये, यदेवेह किञ्चित् विव्रियते ।

ब्रह्मसूत्रकारः विष्णुरूपो ब्रह्मनिधिः महर्षिः कृष्णद्वैपायनः ब्रह्मसूत्रे द्वितीये जन्माद्यधिकरणे विषयममुं स्पष्टं प्रतिपादितवान्, 'अथातो ब्रह्मजिज्ञासा' इति प्रारम्भसूत्रोक्तजिज्ञास्यस्य ब्रह्मणः 'जन्माद्यस्य यतः' इति लक्षणं वदन् । 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म' इति श्रुतिः विषयवाक्यतया अत्र स्वीक्रियते । ऐदम्पर्येण, 'अधीहि भगवो ब्रह्मेति' सम्यगुपसन्नाय शमान्विताय स्वपुत्राय भृगवे तत्पित्रा वरुणेन वात्सल्येन तत्त्वयाथात्म्यबोधकत्वादस्य वाक्यस्य ब्रह्मलक्षणप्रतिपादकत्वं सम्यक् युज्यते । अत्रत्यवाक्यत्रये यथासंख्यम् एषां भूतानां जनि, जीवन, प्रलय, प्रवेशहेतुत्वेन एकमेव ब्रह्म लक्षितमस्ति । ब्रह्मणः यावत् यादृशं च सत्यत्वं तावदेव तादृशमेव एषां भूतानामपि तदिति स्वरसं प्रतीयते ।

### ब्रह्मणः जगत्कारणत्वम्

तत्र लक्षणे ब्रह्मणः जगत् प्रति कारणत्वं 'यतः', 'येन', 'यत्' इति क्रमशः पञ्चमी, तृतीया, द्वितीयानिर्दिष्टं किं

केवलं निमित्तत्वरूपमेव कुलाल इव घटस्य, उत उपादानत्वमपि मृद इव घटस्येति विचारः पूर्वं प्रवर्तते । एकमेव वा ब्रह्म त्रिष्वपि वाक्येषु प्रस्तुतमित्यपि विचारणीयम् । लक्षणत्वं च किं विशेषणविधया, उत उपलक्षणविधयेत्यपि निर्णेयम् । इदं वाक्यत्रयम् एतन्निर्णये पर्याप्तं वा श्रुत्यन्तरम् उपोद्बलकम् अपेक्षितं वेत्यपि ज्ञातव्यम् । विशिष्य एतदपेक्षया समबलं प्रबलं वा तात्पर्यनिर्णायकलिङ्गषट्कमध्यगतं श्रुत्यन्तरं विरुध्य एतन्निर्णयविघटकं भवितुमर्हति वेति च विविच्यते ।

## उपादानत्वम्

प्रथमं तावत्, 'अपादाने पञ्चमी', 'ध्रुवमपायेऽपादानम्' इति सूत्रेण प्रकृतिं, प्रभवहेतुं वा उपादानत्वेन अभिधत्ते । 'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्' इति च उपादानत्वं द्रष्टव्यम् । परमात्मानं धातारं प्रकृत्य, 'सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त जिह्वाः । सप्त इमे लोकाः', 'अतः समुद्रा गिरयश्च सर्वेऽस्मात् स्यन्दन्ते सिन्धवः सर्वरूपाः। अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यन्तरात्मा' इति चैतत् प्रपञ्चितम् । उपादानत्वे सिद्धे लयकारणत्वमपि अविनाभूतमिति (कार्याणां कारणे लयनियमेन) तच्च द्वितीयागम्यमित्यपि स्वरसम् । तदेव 'यत्प्रयन्त्यभिसंविशन्ति' इति, 'सृजते गृह्णते च' इति च प्रतिपादितम् । 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनम्' इति च श्रुतिः ब्रह्मणः लयकारणत्वं वदति । 'तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते', 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।', 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । .... अन्नात् पुरुषः ।' अस्मिन् प्रकरणे आकाशात्, वायोः, अग्नेरित्यादिष्वपि ब्रह्मात्मकेभ्यः तेभ्यस्तेभ्यः उत्तरोत्तरसृष्टिः प्रामाणिकी । 'य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः । .... स नो बन्धुर्जनिता स विधाता', 'स्वयम्भु ब्रह्म परमं तपो यत् । स एव पुत्रः स पिता स माता ।', 'यद्भूतयोनिं परिपश्यन्ति धीराः', 'पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् ।', 'स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगत् स च भूतँ स भव्यम्', 'वसुरण्यो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृक् तेजोदास्त्वमस्यग्नेः वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः' इत्याद्याः ब्रह्मणः जगतश्च संबन्धविशेषान् अभिदधति । स्मृतिश्च, 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।', 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहं', 'विसृजामि पुनःपुनः', 'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुः विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥', 'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे', 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया' इत्यादिका अमुमंशम् उपबृंहयति ।

## निमित्तत्वम्

ब्रह्मणः जगत् प्रति उपादानत्वेन सह निमित्तत्वं च - 'सोऽकामयत । बहु स्यां, प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदँ सर्वमसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्याचक्षते ।' इति, 'असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानँ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः ।' इति, 'तस्यान्तर्मनसि कामः समवर्तत । इदँ सृजेयमिति', 'विधाय लोकान् विधाय भूतानि । विधाय सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्य । आत्मनाऽऽत्मानमभिसंविवेशेति ।' इति, 'यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः', 'य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः', 'यस्येमे हिमवन्तो महित्वा यस्य समुद्रँ रसया सहाऽऽहुः । यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम', 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः', 'अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रो जायते' इत्यादि । 'नारायणात् प्रजायन्ते । नारायणे प्रवर्तन्ते। नारायणे प्रलीयन्ते ।' इति, 'संसारबन्धस्थितिमोक्षहेतुः', 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम् । यदोषधीभिः पुरुषान्पशूँश्च विवेश भूतानि चराचराणि । .... तदेव ब्रह्म परमं कवीनाम्' इति, 'द्यावापृथिवी

जनयन्देव एकः', 'अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम्', इति च श्रुतम् ।

किञ्च, अस्मिन् विषये प्रश्नोत्तरत्वेन, नासदीये 'नासदासीन्नो सदासीत्तदानीम्' इत्यारभ्य, 'तस्माद्धान्यन्न परः किञ्चनास । .... कामस्तदग्रे समवर्तताधि । .... कुत आजाता कुत इयं विसृष्टिः । .... इयं विसृष्टिर्यत आबभूव। यो अस्याध्यक्षः परमे व्योमन्न्', 'किँ स्विद् वनं क उ स वृक्ष आसीत् । यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तत् । यदध्यतिष्ठद्भुवनानि धारयन्न् । ब्रह्म वनं ब्रह्म स वृक्ष आसीत् । यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वः । ब्रह्माऽध्यतिष्ठद्भुवनानि धारयन्न् ।' इति कण्ठरवेण उपादानस्य, अधिष्ठातुः - अर्थात् - निमित्तस्य च, प्रश्नोत्तराभ्यां सुस्पष्टं ब्रह्मैव उपादानं निमित्तं चेति प्रतिपादितमस्ति । अन्यत्रापि 'किं कारणं ब्रह्म कुतः स्म जाताः जीवाम केन क्व च सम्प्रतिष्ठा । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्' इति प्रश्नपूर्वकं ब्रह्मविद्भिः विचार्य 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः', 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः' इत्यादौ ब्रह्म सर्वजगत्कारणमुक्तम् । स्मृतिश्च, 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्', 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्', 'प्रशासितारं सर्वेषाम्', 'स एव सृज्यः स च सृष्टिकर्ता' इत्यादि ।

ब्रह्मणः जगतो लयकारणत्वविषये च पूर्वोक्तश्रुत्याद्यतिरिक्तत्वेन, 'कँ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधिश्रितम् । .... अपां गर्भं व्यदधात्पुरुत्रा', 'यस्मिन्निदँ सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः', इत्याद्याः । स्मृतिश्च - 'लीयेते परमात्मनि', 'यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये' इत्यादि ।

## वस्तुतः सृष्टिरवस्थान्तरापत्त्यात्मिका

बहुभवनसङ्कल्पपूर्वकसृष्टिश्च प्रलयकाले सूक्ष्मतया नामरूपविभागानर्हदशातः स्थूलदशापत्तिः, तदा चराचराणां नामरूपव्याकरणरूपमिति, 'तदैक्षत बहु स्यां प्र जायेयेति तत्तेजोऽसृजत, सेयं देवतैक्षत हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि', 'सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते' इत्यादिभ्यः प्रस्तूयते ।

ब्रह्मणः चिदचिद्रूपजगतश्च संबन्धः शरीरात्मभावत्वेन अपृथक्सिद्धविशेषणत्वरूप इति 'यः पृथिव्यां तिष्ठन्, पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्यर्याम्यमृतः' इत्यारभ्य त्रयोविंशतिपर्यायेषु 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः' इत्यन्तेन अन्तर्यामिब्राह्मणे विस्तरेण न्यरूपि । तदाधारेण 'यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत्तस्य शरीरम्' इति श्रीभाष्ये लक्षितमाचार्यैः । 'संबन्धानधिकरण-संबन्धि-द्वयाधिकरण-कालवर्तिपदार्थभिन्न-पदार्थत्वम् अपृथक्सिद्धत्वमिति च बोध्यम् ।

## श्रुतेः नित्यमबाध्यत्वम्

प्रत्यक्षानुमानाभ्याम् अविलम्बितप्रत्यायकत्वेन प्रबलाभ्यां बाधे श्रुतेः दुर्बलत्वाद्बाध एवेति चेत्, सर्वप्रमाणगोचरत्वे एव तदिति ब्रह्मणः प्रत्यक्षानुमानागम्यत्वात् नात्र ताभ्यां बाधप्रसङ्गशङ्काऽपि । श्रुतावपि निरपेक्षरवत्वेन परस्परबाधः स्यादिति चेत्, सर्वश्रुतिप्रामाण्यं वा तदनङ्गीकारो वेति विहाय मध्यगतिः काऽपि नास्ति, 'परस्परविरोधे हि न प्रकारान्तरस्थितिः' इति न्यायात्, अन्यथा अर्धजरतीयापत्तेः । प्रमाणान्तरागोचरे अन्यथासिद्धत्वानन्यथासिद्ध-त्वादिना मुख्यत्वं, गौणत्वं, महावाक्य, क्षुद्रवाक्यादित्वादिकल्पनातः नास्तिक्यमेव वरम् ।

विरोधभाने घटकवाक्यैः तच्छमनं कर्तव्यं, यथा - 'अष्टाक्षरा गायत्री', 'चतुर्विंशत्यक्षरा गायत्री' चेति परस्परविरुद्धवत् प्रतीयमानयोः वाक्ययोः, 'त्रिपदा गायत्री' इति वाक्यस्य घटनेन अष्टाक्षरत्वं पादाभिप्रायकं, चतुर्विंशत्यक्षरत्वं पूर्णऋगभिप्रायकमिति व्यवस्थापनेन परिहरणम् । एवमेव जगद्ब्रह्मणोः भेदप्रतिपादनं जगदन्तःपातिनोः चिदचितोः नित्यं ब्रह्मविशेषणभूतयोः तत्तत्स्वरूपज्ञापनाभिप्रायं, तयोरेकत्वप्रतिपादनं विशिष्टवेषेण अपृथक्सिद्ध्या वस्तुतः एकत्वाभिप्रायं, शरीरात्मसंबन्धप्रतिपादकघटकवाक्यभूत-अन्तर्यामिब्राह्मणेन साध्यते । यथा शरीरगताः दोषाः

आत्मनि न प्रवर्तन्ते तथैव चेतनाचेतनगतदोषाः विशेष्ये ब्रह्मणि नानुयन्ति । तस्य चेश्वरत्वं नियन्तृत्वम् आधारत्वादिकं हेयप्रतिभटत्वं समस्तकल्याणगुणाकरत्वं च सुस्थम् । एवं सर्वश्रुतिवाक्यानां मुख्यवृत्त्या प्रामाण्यं परिरक्षितमिति अयमेव आस्तिकानां सुपन्थाः । गीतास्वपि जन्ममरणे 'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि' इतिवत् देहप्रवेश-त्यागावेवेति प्रतिपादितम् ।

## उपादान-निमित्तयोरेकत्वे आक्षेप-परिहारौ

अत्र ब्रह्मणः जगत्कारणत्वे सृष्टिकारणत्व, स्थितिकारणत्व, लयकारणत्वानि किं सम्भूय एकं लक्षणम्, आहोस्वित् प्रत्येकं विभिन्नलक्षणमिति चोद्ये, प्रथमविकल्पे कालभेदात् असम्भवः, यतः स्रष्टृत्वदशायामेव स्थिति, लयकारणत्वे युज्यते इत्यादिना इति दोषं, द्वितीयविकल्पे अन्यतरस्य ग्रहणे अवशिष्टलक्षणद्वयवैयर्थ्यमिति च दोषम् आपादयतः प्रति इत्थमुच्यते - भिन्नप्रवृत्तिनिमित्तत्वात् त्रयाणां लक्षणांशानां कालभेदात्, व्यवस्थितक्रमभावित्वात् च एकत्वे मिलित्वा वा लक्षणे न दोष इति परिहारः । एकस्य विवक्षितत्वे इतरे उपलक्ष्यन्ते, व्यावर्तकत्वात् । विशेषणविधया एकस्य विशेष्यस्य बहुविशेषणवत्त्वं आकृतिगणन्यायाद्युज्यत एव । 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्राप्येवमेव खलु समाधीयते ।

नैयायिकैः अनुमानेनापि ब्रह्मणः जगत्कारणत्वं साध्यमित्यभिमाने साध्याप्रसिद्धि, व्याप्तिविरहादिदोषाः उन्नेयाः । तत्र एकस्यैव सृष्टि, स्थिति, संहार, बन्धमोचकत्वादीनाम् अनुमानेनापि साधयितुं न शक्यत इति स्पष्टमेव । यतः ब्रह्म प्रत्यक्षानुमानाद्यगोचरं, शास्त्रैकसमधिगम्यं, सकलेतरविलक्षणं, सपक्षविपक्षशून्यं च, ततः नानुमातुं नापह्नोतुं च शक्यं प्रत्यक्षेण अनुमित्या वेति सर्वं निरवद्यम् ॥

'कस्मिन्नु खलु विज्ञाते इदं सर्वं विदितं भवति' इति प्रश्नस्य कारणविज्ञानात् कार्यविज्ञानसिद्धेः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अपि कार्यकारणयोरनन्यत्वं प्रतीयते । 'अवस्थान्तरापत्तिरेव हि कार्यता' इति भाषितं च । अतः ब्रह्मणः एकस्यैव सर्वावस्थास्वपि चिदचिद्विशिष्टस्य कारणावस्थायां महाप्रलये सूक्ष्मचिदचिद्विशिष्टत्वं नामरूपविभागानर्हत्वमिति यावत् । कार्यावस्थायां सृष्टौ स्थूलचिदचिद्विशिष्टत्वं, नामरूपैः व्याकृतत्वमिति भिदा । स्थूलावस्थापत्तिरेव बहुभवनसङ्कल्पविषयः । 'अचिदविशिष्टान् प्रलये जन्तूनवलोक्य जातनिर्वेदा । करणकलेबरयोगं वितरसि वृषशैलनाथकरुणे त्वम्' इति ब्रह्मणः श्रीनिवासस्य कृपाकारिता सृष्टिरिति मनोज्ञं वर्णितं श्रीमद्वेदान्ताचार्यैः दयाशतके । छान्दोग्ये सद्विद्याप्रकरणे उद्दालकमहर्षिणा श्वेतकेतुं स्वपुत्रं जिज्ञासुं प्रति अनेकदृष्टान्तपुरस्सरं प्रपञ्चितम्, आरम्भणाधिकरणे च सिद्धान्तितमेतत् ।

## उपादानस्यैव लयकारणत्वे आक्षेप-परिहारौ

'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति न्यायेन अनुन्मत्तस्य बुद्धिमतः पुंसः स्रष्टृत्व, रक्षकत्व, संहर्तृत्वानां विरोधाच्च, तथा 'खण्डो मुण्डः पूर्णशृङ्गो गौः' इत्यत्र गोशब्दैक्येऽपि खण्डत्वादिना भेदप्रतीतिवदिह ब्रह्मशब्दैक्येऽपि खण्डत्वादीनां विरुद्धत्ववत् 'जायन्ते', 'जीवन्ति' इत्यादि वर्तमाननिर्देशावगत एककालीनानां भूतनिष्ठजन्मादीनां विरोधात् जन्मादिकारणत्वानां परस्परविरुद्धत्वेन ब्रह्मबहुत्वादीनां प्रसङ्गः दुर्वारः । 'देवदत्तः श्यामो युवा लोहिताक्षः समपरिमाणः' इत्यत्र विशेष्यभूतैकस्मिन् देवदत्ते श्यामत्व, युवत्वाद्यनेकधर्माविरोधवत्प्रत्यक्षावगताभेदप्रतीति-जनकहेत्वभावाच्च । संहर्तुः कृपावत्त्वं कथमित्यादीनामपि समाधानं दुष्करम् ।

अत्र समाधानं त्वित्थम् - विशेषणानां स्वाश्रयभेदकतया ब्रह्मनानात्वप्रसङ्गो न शक्यः, भिन्नाश्रयत्वेन निर्धारितानामेव तथात्वेऽपि एकाश्रयत्वेनावगतानां श्यामत्वादीनामिव अत्र यतः, येनेत्याद्यनुवादस्य पुरोवादभूत 'सन्मूलाः' इत्यादिवाक्यावगत सदेकाश्रयत्वेन अवगतस्थित्यादीनाम् आश्रयभेदकत्वाप्रसक्त्या ब्रह्मनानात्वानवकाशात् । न चैककालीनानां तेषां विरोधः शक्यः 'ईङ्काराय स्वाहा' इत्याद्यश्वचरितहोमवत्, 'अस्ति', 'जायते', 'विपरिणमते' इत्यादि भावविकारेष्विव, तथा 'निद्राति स्नाति भुङ्क्ते चलति कचभरं शोधयत्यन्तरास्ते' इत्यादाविव एकावान्तरस्थूलोपाधिप्रयुक्त-एकस्थूलकालमादाय अनेकक्रियावर्तमानत्ववदत्रापि जन्मादीनामेकस्थूलकालमादाय एकधर्मिणि विरोधानवकाशात् । यथा सस्यादिविषये कर्षकादेरेकस्यैव बुद्धिमतः सस्याद्युत्पादकत्व, रक्षकत्व,

लावकत्ववत् पित्रादीनां हितैषिणां पुत्रादिविषये रोगापराधादिभूयस्त्वे सति निगलबन्धकत्वादिशिक्षकत्ववत् सार्वभौमस्योद्यानादिविषये तत्तत्कालानुगुण्येनोत्पादकत्वादिवच्च भगवतः स्रष्टृत्वादिसम्भवात् । तस्माज्जन्मादीनाम् अविरुद्धता । संहर्तृत्वं च शरीरसंबन्धेन 'वासांसि जीर्णानि यथा विहाय' इतिवत् कर्मानुगुणफलप्रदत्वात् । किञ्च, लयस्य दयाकार्यत्वं सुषुप्ताविव, अपितु सुदीर्घकालाय, चेतनानां क्लेशपरम्परातः विश्रान्तिप्रदानादिमुखेन भवति ।

उपादानं निमित्तं च ब्रह्मैव जगतः श्रुतम् । सूक्ष्मत्वं कारणावस्थं स्थूलत्वं कार्यकालगम् ॥

भगवद्भाष्यकारैर्हि साधितस्य प्रपञ्चनम् । प्रमाणगणसिद्धत्वं प्रत्यपादि यथामति ॥

वेदाध्यापनधर्मस्य पालनप्राप्तकीर्तयः । परमाचार्यवाचाऽपि श्रोत्रियाः कामनाऽहताः ॥

राजगोपालशर्माणः एधन्तां शरदां शतम् । इति विज्ञापयत्येष रामानुजसुधीर्मुदा ॥

चिदचिच्छरीरी नामरूपव्याकर्ता प्रीयतां मे जनार्दनः ।

शुभमस्तु ॥